लोकप्रियसाहित्यग्रन्थमाला–27

# कवितावलिः

## (महावीरप्रसादद्विवेदिनः संस्कृतकाव्यानां सङ्कलनम्)

सम्पादकः

प्रो. राधावल्लभः त्रिपाठी

राष्ट्रियसंस्कृतसंस्थानम्

नवदेहली

# महावीर प्रसाद द्विवेदी-कवितावली

सम्पादकः

प्रो० राधावल्लभः त्रिपाठी

राष्ट्रियसंस्कृतसंस्थानम्
( मानितविश्वविद्यालयः )
नवदेहली-110058

# प्रस्तावना

आचार्यो महावीरप्रसादो द्विवेदी (१८६४-१९३८ ई.) हिन्दीसाहित्ये युगप्रवर्तकः समीक्षकः पत्रकारश्च। अस्य नाम्ना आधुनिक हिन्दीसाहित्यस्य एकः कालखण्डः द्विवेदीयुगम् (१८९३-१९१८ ई.) इति समाम्नायते। सरस्वतीति मासिकपत्रिकायाः सम्पादकत्वेन अनितरसारधारणीं सारस्वत-सपर्यामयं सम्पादयामास।

द्विवेदिवर्यः संस्कृतभाषायाः संस्कृतसाहित्यस्य पाण्डित्येनापि कामपि ख्यातिं प्राप। नैषधचरितचर्चा, कालिदास की समालोचना, कालिदास की निरंकुशता, कालिदास और उनकी कविता, आलोचनाञ्जलि इत्यादयोऽस्य संस्कृतसाहित्यविषयकाः ग्रन्थाः प्राकाश्यं गताः। 'कुमारसम्भवसारं' सम्पूर्य महाभारतमप्यनेन १९०८ ई. वर्षे भाषान्तरीकृत्य प्रस्तुतम्। तथैव 'नैषधचरितचर्चा' 'विक्रमाङ्कदेवचरितचर्चा' इत्यादयो ग्रन्था अस्य अध्ययन-विवेकं प्रमाणयन्ति। पुष्पदन्तविरचितस्य शिवमहिम्नस्तोत्रस्य अत्यन्तं रमणीयं रूपान्तरमनेन १८८५ तमे क्रिस्त्वब्दे विहितम्। भर्तृहरेः वैराग्यशतकस्य हिन्दीरूपान्तरमेतत्कृतं १८८९ ई. वर्षे प्रकाश्यतां गतम्। गीतगोविन्दस्य अनुवादमसौ विहारवाटिकेतिनाम्ना १८९० ई. वर्षे प्राकाशयत्। एवमेव गङ्गालहरी (१८९१), भामिनीविलासः (१८९१), अमृतलहरी (१८९६), कुमार-सम्भवसारः (१९०२) इत्याद्या अन्या अस्य रूपान्तरिताः कृतयः।

अस्य काव्यसङ्ग्रहेषु काव्यमञ्जूषा १९०३ ई. वर्षे प्रकाश्यतां याता। अस्यां ३३ काव्यानि सम्पुटितानि। तेषु शिवाष्टम्, (१८९५) प्रभातवर्णनम् (१८९६), अयोध्याधिपस्य प्रशस्तिः (१८९६), कान्यकुब्जलीलामृतम् (१८९८), समाचारपत्रसम्पादकस्तवः (१८९८) सूर्यग्रहणम् (१८९८), मेघमालां प्रति चन्द्रिकोक्तिः (१८९८) कथमहं नास्तिकः (१८९८) इत्यष्टौ काव्यानि संस्कृतेन गुम्फितानि, शिष्टानि हिन्द्याम्।

# अनुक्रमः


| क्रमः | कविता | पृष्ठाङ्कः |
|---|---|---|
| | सम्पादकीयम् | *iii* |
| १. | कान्यकुब्जलीलामृतम् | १ |
| २. | समाचारपत्रसम्पादकस्तवः | ९ |
| ३. | मेघमालां प्रति चन्द्रिकोक्तिः | १३ |
| ४. | कथमहं नास्तिकः | १८ |
| ५. | काककूजितम् | २४ |
| ६. | सूर्यग्रहणम् | २७ |
| ७. | शिवाष्टकम् | ३४ |
| ८. | प्रभातवर्णनम् | ३६ |
| ९. | अयोध्याधिपस्य प्रशस्तिः | ३९ |

आस्ते यथोक्तैव दशा त्वदीया
तथापि केचिद्भुवि कान्यकुब्जाः।
सन्त्येव शुद्धाचरणाश्च येषां
सन्दर्शनं पुण्यकरं नराणाम्॥ ३०॥

आस्तामिदं तत्तव लीलयाऽलं
पारं व्रजेत्कः कथनेन तस्याः?
अतोऽधुना साञ्जलिबन्धमेत-
द्यदुच्यते तच्छृणु भूसुरेन्द्र!॥ ३१॥

दिनानि ते तानि गतानि, नातः
शुष्काभिमानेन सुवंशजेन।
भविष्यति त्वत्कुशलं कदापि
विचिन्तयान्तःकरणे त्वमेव॥ ३२॥

त्यजालसं, शीलय विप्र! विद्यां
विधेहि दुष्टव्यवहारनाशम्।
उदारतां बन्धुषु दर्शय त्वं
कुरुष्व कार्यं सुजनादृतां च॥ ३३॥

महत्त्वमायाति हि मानवेषु
सुविद्ययैवात्र मनुः प्रमाणम्।
मन्दादरस्तद्वचने यदि त्वं
तदा न किं हन्त हतः स्वधर्मः?॥ ३४॥

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

( भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः )

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी

नवदेहली-110058